विद्या भवन बालिका विद्यापीठ लखीसराय

वर्ग दशम् विषय संस्कृत विषय श्यामउदय सिंह

ता:18-01-2020( एन. सी.ई.आर.टी.पर आधारित)

पाठ:षष्ठ: पाठनाम सुभाषितानि (बोर्ड बेस्ड क्वेश्चन)

1. **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

   निमित्त्मुद्दिश्य हि यः प्रकुप्यति,
   ध्रुवं स तस्यापगमे प्रसीदति।
   अकारणद्वेषि मनस्तु यस्य वै,
   कथं जनस्तं परितोषयिष्यति।।

   I. **एकपदेन उत्तरत-**
      i. नरः किम् उद्दिश्य प्रकुप्यति?
      ii. नरः कदा प्रसीदति?

   II. **पूर्णवाक्येन उत्तरत-**
      i. यस्य मनुष्यस्य मनः अकारणद्वेषि अस्ति किं सः कदापि प्रतितोषयिष्यति?

   III. **भाषिक कार्यम्-**
      i. 'यः' पदं पद्यांशे कस्मै प्रयुक्तम्?
         (क) निमित्तस्य
         (ख) प्रसीदाय
         (ग) नराय
         (घ) प्रकुप्याय
      ii. 'प्रकुप्यति' क्रिया पदस्य कर्तृपंद किम्?
         (क) उद्दिश्य
         (ख) यः
         (ग) हि
         (घ) मिमित्तम्
      iii. सः इति कर्तृपदस्य क्रिया पदं किम्?
         (क) ध्रुवं
         (ख) प्रसीदति
         (ग) तस्य
         (घ) अपगमे

2. **मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकद्वयस्य अन्वयं पूरयत।**

| |
|---|
| **मञ्जूषा-** छाया, महावृक्षः, नास्ति, दैवात्, अयोग्यः, अनौषधम्, योजकः, अक्षरं |

   I. सेवितव्यो महावृक्षः फलच्छायासमन्वितः।
   यदि दैवात् फलं नास्ति छाया केन निवार्यते।।

**अन्वयः-** फलच्छाया समन्वितः (i)__________ सेवितव्यः (ii)__________ यदि फलं (iii)__________ (वृक्षस्य) (iv)__________ केन निवार्यते।

II. अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषमम्।
अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः॥

**अन्वयः-** अमन्त्रम् (i)__________ नास्ति (ii)__________ मूलं नास्ति, (iii)__________ पुरुषः नास्ति, तत्र (iv)__________ दुर्लभः।

3. **अधोलिखित श्लोकानाम् भावर्थम् मञ्जूषायाः सहायतया उचित-क्रमेण पूरयत्।**

क्रोधो हि शत्रुः प्रथमो नराणां,
देहस्थितो देहविनाशनाय।
यथास्थितः काष्ठगतो हि वाह्निः,
स एव वह्निर्दहते शरीरम्॥

**भावार्थः-** अर्थात् मनुष्याणां शरीरेषु स्थितः (i)__________ एव तेषां देहानाम् विनाशस्य प्रथमः (ii)__________ अस्ति। यथा काष्ठेषु स्थितः अग्निः तमेव (iii)__________ तथैव क्रोधरूपाग्निः अपि (iv)__________ शरीराणि दहति।

| |
|---|
| **मञ्जूषा-** शत्रुः, जनानाम्, क्रोधः, दहति |

## Answer

1.
   I. (i) निमित्तम्
   (ii) तस्यापगमे
   II. (i) यस्य मनुष्यस्य मनः अकारणदेषि अस्ति तं जनः कदापि न परितोषयिष्यति।
   III. (i) (ग) नराय
   (ii) (ख) यः
   (iii) (ख) प्रसीदति
2.
   I. (i) महावृक्षः (ii) दैवात् (iii) नास्ति (iv) छाया
   II. (i) अक्षर (ii) अनौषधम् (iii) अयोग्यः (iv) योजकः
3. i. शत्रुः, ii. क्रोधः, iii. दहति, iv. जनानाम्